# .. Jivanmuktanandalahari ..

# ॥ જીવન્મુક્તાનન્દલહરી ॥

## Document Information

```
Text title : Jivanmuktanandalahari
File name : Jivanmuktanandalahari.itx
Category : laharI
Location : doc_z_misc_shankara
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Sunder Hattangadi sunderh at hotmail.com
Latest update : April 15, 2010
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ જીવન્મુક્તાનન્દલહરી ॥

પુરે પૌરાન્પશ્યન્નરયુવતિનામાકૃતિમયાન્
સુવેષાન્સ્વર્ણાલઙ્કરણકલિતાંશ્ચિત્રસદૃશાન્ ।
સ્વયં સાક્ષાદ્દૃષ્ટેત્યપિ ચ કલયંસ્તૈઃ સહ રમન્
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧॥

વને વૃક્ષાન્પશ્યન્દલફલભરાન્નમ્રસુશિખાન્
ઘનચ્છાયાચ્છન્નાન્બહુલકલકૂજદ્વિજગણાન્ ।
ભજન્ઘસ્રોરાત્રાદવનિતલકલ્પૈકશયનો
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૨॥

કદાચિત્પ્રાસાદે ક્વચિદપિ ચ સૌધેષુ ધનિનાં
કદા કાલે શૈલે ક્વચિદપિ ચ કૂલેષુ સરિતામ્ ।
કુટીરે દાન્તાનાં મુનિજનવરાણામપિ વસન્
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૩॥

ક્વચિદ્બાલૈઃ સાર્ધં કરતલજતાલૈઃ સહસિતૈઃ
ક્વચિત્તારુણ્યાલઙ્કૃતનરવધૂભિઃ સહ રમન્ ।
ક્વચિદ્વૃદ્ધૈશ્ચિન્તાકુલિત હૃદયૈશ્ચાપિ વિલપન્
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૪॥

કદાચિદ્વિદ્વદ્ભિર્વિવિદિષુભિરત્યન્તનિરતૈઃ
કદાચિત્કાવ્યાલંકૃતિરસરસાલૈઃ કવિવરૈઃ ।
કદાચિત્સત્તર્કૈરનુમિતિપરસ્તાર્કિકવરૈર્
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૫॥

કદા ધ્યાનાભ્યાસૈઃ ક્વચિદપિ સપર્યાં વિકસિતૈઃ
સુગંધૈઃ સત્પુષ્પૈઃ ક્વચિદપિ દલૈરેવ વિમલઃ ।
પ્રકુર્વન્દેવસ્ય પ્રમુદિતમનાઃ સંનતિપરો
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૬॥

શિવાયાઃ શંભોર્વા ક્વચિદપિ ચ વિષ્ણોરપિ કદા
ગણાધ્યક્ષસ્યાપિ પ્રકટિતવરસ્યાપિ ચ કદા ।
પઠન્વૈ નામાલિં નયનરચિતાનન્દસરિતો
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૭॥

કદા ગઙ્ગામ્ભોભિઃ ક્વચિદપિ ચ કૂપોત્થસલિલૈઃ
ક્વચિત્કાસારોત્થૈઃ ક્વચિદપિ સદુષ્ણૈશ્ચ શિશિરૈઃ ।

ભજન્સ્નાનં ભૂત્યા ક્વચિદપિ ચ કર્પૂરનિભયા
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૮॥

કદાચિજ્જાગર્ત્યાં વિષયકરણૈઃ સંવ્યવહરન્
કદાચિત્સ્વપ્નસ્થાનપિ ચ વિષયાનેવ ચ ભજન્ ।
કદાચિત્સૌષુપ્તં સુખમનુભવન્નેવ સતતં
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૯॥

કદાપ્યાશાવાસાઃ ક્વચિદપિ ચ દિવ્યામ્બરધરઃ
ક્વચિત્પઞ્ચાસ્યોત્થાં ત્વચમપિ દધાનઃ કટિતટે ।
મનસ્વી નિઃસઙ્ગઃ સુજનહૃદયાનન્દજનકો
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧૦॥

કદાચિત્સત્ત્વસ્થઃ ક્વચિદપિ રજોવૃત્તિસુગત-
સ્તમોવૃત્તિઃ ક્વાપિ ત્રિતયરહિતઃ ક્વાપિ ચ પુનઃ ।
કદાચિત્સંસારી શ્રુતિપથવિહારી ક્વચિદહો
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧૧॥

કદાચિન્મૌનસ્થઃ ક્વચિદપિ ચ વાગ્વાદનિરતઃ
કદાચિત્સ્વાનંદં હસિતરભસસ્ત્યક્તવચનઃ ।
કદાચિલ્લોકાનાં વ્યવહૃતિસમાલોકનપરો
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧૨॥

કદાચિચ્છક્તીનાં વિકચમુખપદ્મેષુ કમલં
ક્ષિપંસ્તાસાં ક્વાપિ સ્વયમપિ ચ ગૃહ્ણન્સ્વમુખતઃ ।
તદદ્વૈતં રૂપં નિજપરવિહીનં પ્રકટયન્
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧૩ ॥

ક્વચિચ્છૈવૈઃ સાર્થં ક્વચિદપિ ચ શાક્તૈઃ સહ વસન્
કદા વિષ્ણોર્ભક્તૈઃ ક્વચિદપિ ચ સૌરૈઃ સહ વસન્ ।
કદા ગાણાપત્યૈર્ગતસકલભેદોઽદ્વયતયા
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧૪॥

નિરાકારં ક્વાપિ ક્વચિદપિ ચ સાકારમમલં
નિજં શૈવ રૂપં વિવિધગુણભેદેન બહુધા ।
કદાશ્ચર્યં પશ્યન્કિમિદમિતિ હૃષ્યન્નપિ કદા
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧૫॥

કદા દ્વૈતં પશ્યન્નખિલમપિ સત્યં શિવમયં
મહાવાક્યાર્થાનામવગતિસમભ્યાસવશતઃ ।

ગતદ્વૈતાભાસઃ શિવ શિવ શિવેત્યેવ વિલપન્
મુનિર્ન વ્યામોહં ભજતિ ગુરુદીક્ષાક્ષતતમાઃ ॥ ૧૬॥

ઇમાં મુક્તાવસ્થાં પરમશિવસંસ્થાં ગુરુકૃપા-
સુધાપાઙ્ગાવાપ્યાં સહજસુખવાપ્યામનુદિનમ્ ।
મુહુર્મજ્જન્મજ્જન્ભજતિ સુકૃતૈશ્ચેન્નરવરઃ
તદા ત્યાગી યોગી કવિરિતિ વદન્તીહ કવયઃ ॥ ૧૭॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
જીવન્મુક્તાનન્દલહરી સમ્પૂર્ણા ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. Jivanmuktanandalahari ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*